International Journal of Academic Research
ISSN: 2348-7666; Vol.4, Issue-12(2), December, 2017
Impact Factor: 6.023; Email: drtvramana@yahoo.co.in

# अभिज्ञानशाकुन्तलम्-मानवजीवनदर्पणम्

**Dr. K.V.R.B. VARALAKSHMI**
**Head of the Department,**
**Department of Sanskrit**
**Sri Y.N.M. College, Narsapur**
**Cell : 9393392619**

कविकुलगुरुरिति सुप्रसिद्धः महाकविकालिदासः रघुवंशम्, कुमारसम्भवम् इति द्वे महाकाव्ये, मेघदूतम्, ऋतुसंहारम् इति द्वे लघुकाव्ये च अरचयत्। अपि च अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम् इति त्रीणि नाटकानि व्यरचयत्। एतेषु नाटकेषु अभिज्ञानशाकुन्तलम् सर्वश्रेष्ठतमं भवति। महाकविः कालिदासः मूलकथायां कतिचन परिवर्तनं कृत्वा स्वीयरचना कौशलं , रसपरिपोषणं, कलावैभवं, मानवजीवनविधानं च प्रादर्शयत्। अत एव

**"काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।**

**तत्राऽपि चतुर्थाङ्कः तत्र श्लोकचतुष्टयम्॥**

इति प्रशंसामवाप।

अभिज्ञानं प्रधानं शाकुन्तलं इति विग्रहवाक्यस्य मध्यमपदलोपि समासमेव अभिज्ञानशाकुन्तलमिति। अस्य नाटकस्य मङ्गलश्लोके अष्टमूर्तिरुपः शिवः प्रस्तुतः।[1]

अस्मिन्नाटके नायक पुरुकुलावतंसो दुष्यन्तः। नायिका शकुन्तला। अस्य नाटकस्येतिवृत्तं श्रीमन्महाभारतात् स्वीकृतम्। नाटकेऽस्मिन् सप्ताङ्काः सन्ति। चत्वारि प्रधान स्त्रीपात्राणि सन्ति। गौतमी, शकुन्तला, अनसूया, प्रियंवदा चेति। नाटकेऽसिन् तत्तत्पात्राणां सम्भषणेन प्रकृति परिरक्षणं, वृक्षसेचनादि क्रियैः वृक्षसंरक्षणं, वृक्षेषु सहजस्नेहस्वभावं च वर्णितम्। यथा-

अभिज्ञानशाकुन्तले प्रथमाङ्के वृक्षसेचनसमये अनसूया शकुन्तलां प्रति "त्वत्तोऽपि तातकाश्यपस्याश्रमवृक्षकाः प्रियतरा इति तर्कयामि" इति अवोचत्। तच्छ्रुत्वा शकुन्तला वृक्षेषु ममापि सोदरस्नेहः अस्तीति अवोचत्।[2]

ततः अन्यस्मिन् सन्दर्भे अनसूया शकुन्तलायाः जन्मवृत्तान्तं सर्वं दुष्यन्तं प्रति अकथयत्।[3] एवं अनसूयावचनानि दुष्यन्तमनसि स्थितशङ्कां अपनयत्।

ततः तृतीयाङ्के दुष्यन्तानुरक्तां शकुन्तलां प्रति सख्यौ सम्भाषणावसरे तयोः मुग्धत्वं ताभिर्वचनैः एवं ज्ञायते।[4] तव सन्तापस्य कारणं किम्? सन्तापकारणं अज्ञात्वा प्रतीकारं कर्तुं न शक्यते इत्यवोचत्।

अपि च शकुन्तला गान्धर्वविवाहान्तरं चतुर्थाङ्कप्रारम्भे अनसूया राजा अन्तःपुरं प्रविश्य गत वृत्तान्तं स्मरति वा न वेति विचारयति।[5] तदा प्रियंवदा "महाराजसदृशा महोन्नताकृतिविशेषाः गुणविरोधिना न भवन्ति इत्यवोचत्। एतयोः सम्भाषणेन प्रियसखीं प्रति तयोः प्रीतिः स्नेहप्रवृत्तिश्च दरीदृश्यते। यत्राकृतिस्तत्र गुणावसन्ति इत्युक्तिः सार्थकी अभवत्। अनसूया वाग्भिः सद्गुणसमन्वितवराय कन्यका प्रदेया इत्यवोचत्। कन्या सदा सद्गुणसमन्वितं वरं प्रदेया इति लोकमुद्बोधयत्।

अपि च चतुर्थाङ्के दुर्वास शापवृत्तान्तं श्रुत्वा अनसूयप्रियंवदयोः परस्परसम्भाषणस्नेहस्य आदर्शा अभवत्। दुर्वासशापं श्रुत्वा अनसूयाप्रियंवदे तस्य पादौ निपत्य शकुन्तलायाः अन्यमनस्कतयाः कारणं उक्त्वा शापनिवृत्तिकारणं प्रार्थयत्। अभिज्ञानाभरणदर्शनं शापनिवारणहेतुरिति प्रियंवदा मुखेन ज्ञात्वा अनसूया दुष्यन्तनामधेयाङ्कितमङ्गुलीयकं शकुतलायाः समीपं अस्तीति सन्तुष्टिमवाप। प्रकृतिकुसुमकोमलां शकुन्तलां प्रति एष वृत्तान्तः न विज्ञापनीयः इति ते अचिन्तयत्।

भर्तृहरिमहाकविः सन्मित्रलक्षणं एवं अवदत्।

**"पापान्निवारयति योजयते हिताय, गुह्यं निगूहति गुणान् प्रकटीकरोति।**

**आपद्गतं न जहाति ददाति काले, सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥"[6]**

सन्मित्रलक्षणसमन्वितौ अनसूयाप्रियंवदे इति ज्ञायते। शापवृत्तान्तविषयः, तन्निवारणोपायश्च ताभ्यां मुखे अनिष्टत्।

अपि च शकुन्तलापतिगृहप्रस्थानसमये अनसूयप्रियंवदयोः सम्भाषणं नारीजनस्य दर्पणसदृशोऽभवत्। सुशिष्यपरिदत्ता विद्या इव ऋषिरक्षिता शकुन्तला अपि दुष्यन्तं प्राप्य

अशोचनीया अभवत् इति दुष्यन्तं प्राप्य अशोचनीया अभवत् इति महर्षिः शकुन्तलां अभिनन्द्यप्रस्थानसन्नाहमकरोत् इति प्रियंवदा अनसूयां प्रत्यवोचत्।

शकुन्तला तपस्वीभिः आशीर्वचनं प्राप्य तदनन्तरं "दुर्लभमिदानीं मे सखीमण्डनं भविष्यति" इत्यचिन्तयत्।[7] शकुन्तलायाः अलङ्करणानन्तरं गौतमी शकुन्तलां पितुः आशीः स्वीकर्तुं आदिशात्। कण्वमहर्षेः मनः व्याकुलोऽभूत्। भाष्पवृष्टया दृष्टेः अवरोधः अभवत्। तनयाः पतिगृहगमनं व्याकुलचित्तं अकरोत्। पुत्रिकायां प्रति अव्याजप्रमा आविष्करोति।[8] आधुनिककाले बालिकाजननं अपि जना नाङ्गीकुर्वन्ति।

पर्यावरणस्य प्रथमस्थानं दृश्यते। "पातुं न प्रथमं....."[9] इति श्लोके वृक्षाणां जलं दत्वा तदनन्तरं जलं पिबति। वृक्षाणां प्रथमकुसुमविकासे आनन्दं अनुभवति। वृक्षाणां पल्लवं पत्रं, पुष्पं अपि अलङ्करणार्थं न चिनोति। तादृशी शकुनतला पतिगृहं गच्छति अनुज्ञां ददतु इति वनदेवतेभ्यः आशीः अभ्यर्थयत्। "सुश्रूष स्वगुरून्........" इति श्लोके गुरुजनसेवां कुरु। सपत्नीजनेषु स्नेहप्रवृत्या चलतु। भर्तृः आग्रहकारकाः कार्याः मा कुरु। सेवकजनेषु दयां कुरु। सम्पदः प्राप्य गर्वितो माऽभूत्। एते गृहित्या लक्षणानि[10] इति मानवजीवने सदा आचरणीययोग्यानि लक्षणानि, प्रकृति परिरक्षणं, वृक्षरक्षणं च अकथयत्।

एवं रीत्या महाकवि कालिदासः अभिज्ञानशाकुन्तलनाटके मानवजीवनस्य आदर्शलक्षणानि प्रकृतिपरिरक्षणं वृक्षरक्षणं च अकथयत्।

**उपयुक्तग्रन्थसूची :**

1. भर्तृहरिसुभाषितानि-जि.वि.ए. पब्लिकेषन्स्-कस्सावारिब्बीथि, विजयवाडा-१९३९
2. अभिज्ञानशाकुन्तलम्-मोतीलालबनारसी दास्-दिल्ली-१९६९
3. संस्कृतसाहित्यचरित्र —पोटिश्रीरामुलु तेलुगु विश्वविद्यालयम्-मुदिगोण्ड गोपालरेड्डि, मुदिगोन्ड सुजातारेड्डि-हैदराबाद्-१९९७
4. महाभारतसंग्रहः-श्रीजयलक्ष्मी पब्लिकेषन्स्, हैदराबाद्-२०१२
5. Works of Kalidasa-Vol-I, Motilal Banarasidas-Delhi-1972
6. Works of Kalidasa-Vol-II, Motilal Banarasidas-Delhi-1986
7. History of Classical Sanskrit Literature-M. Krishnamachar, Motilal Banarasidas-Delhi-1970

---

**उद्धरणानि :**

1. अभिज्ञानशाकुन्तलम्- "या सृष्टिः स्रष्टुराद्या वहति विधिहुतं" इति श्लो-१-अङ्कः-१, पृ.-१
2. अभिज्ञानशाकुन्तलम्-प्रथमाङ्कः-पृ. २४
3. अभिज्ञानशाकुन्तलम्- प्रथमाङ्कः-पृ. ४२
4. अभिज्ञानशाकुन्तलम्- चतुर्थाङ्कः-पृ. ९४
5. अभिज्ञानशाकुन्तलम्- चतुर्थाङ्कः-पृ. १२०

6 भर्तृहरिसुभाषितानि-सुजनपद्धतिः-श्लो-६५, पृ.-८८

7. अभिज्ञानशाकुन्तलम्- चतुर्थाङ्कः-पृ. १२६
8. अभिज्ञानशाकुन्तलम्- षष्ठाङ्कः-पृ. २८०
9. अभिज्ञानशाकुन्तलम्- नवमाङ्कः-पृ. २४२
10. अभिज्ञानशाकुन्तलम्- श्लो-१७-पृ. २५२